नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**

No. of Printed Pages – **3**

# VU-86-Vyak. Shastra

## व्याकरणशास्त्रम् (ऐच्छिकम्)

### वरिष्ठ उपाध्याय परीक्षा, 2020

**समय : 3¼ घण्टे**

**पूर्णांक : 80**

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतो लेखनीयः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तरानिउत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि ।

(5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि ।

1. सम्प्रसारणसंज्ञा केन सूत्रेण भवति ? 1

2. 'सुद्यौः' इत्यत्र दिविति प्रातिपदिकस्य औत् केन सूत्रेण भवति ? 1

3. 'आपः' इत्यत्र दीर्घः केन सूत्रेण भवति ? 1

4. 'अद्भिः' इत्यत्र पकारस्य तकारः केन सूत्रेण भवति ? 1

5. 'अव्ययादाप्सुपः' इति सूत्रस्यार्थो लेख्यः । 1

6. करणं किम् ? स्पष्टयत । 1

7. 'गां दोग्धि पयः' इत्यत्र कर्मसंज्ञाविधायकं सूत्रं लिखत । 1

8. 'हरये नमः' इत्यत्र चतुर्थी केन सूत्रेण भवति ? 1

9. 'क्तिन्नन्तः' इति सूत्रस्योदाहरणं लिखत । 1

10. 'नङन्तः' इति सूत्रस्यार्थो लेख्यः । 1

11. 'हो ढः' इति सूत्रस्य सोदाहरणमर्थो लेख्यः । 2

12. 'पन्थाः' इत्यत्र इकारस्य अकारः केन सूत्रेण भवति ? 2

13. 'यः सौ' इति सूत्रस्य सोदाहरणमर्थो लेख्यः । 2

14. किम् इति शब्दस्य स्त्रीलिङ्गे सर्वाणि रूपाणि लिखत । 2

15. 'आच्छीनद्योर्नुम्' इति सूत्रस्य सोदाहरणमर्थो लेख्यः । 2

16. 'दीव्यन्ती' इत्यत्र नुमागमः केन सूत्रेण भवति ? 2

17. 'अपदादिविधौ किम् ? दधिसेचौ ।' – पङ्क्तेराशयं स्पष्टयत । 2

18. सहार्थेन युक्तेऽप्रधाने का विभक्तिर्भवति ? 2

19. कौचिद् द्वौ प्रयोगौ साधनीयौ – 2 + 2 = 4
विश्वौहः, अनड्वान्, चतुर्णाम् ।

20. 'अष्टन आ विभक्तौ' इति सूत्रं सोदाहरणं व्याख्यायताम् । 4

21. कौचिद् द्वौ प्रयोगौ साधनीयौ – 2 + 2 = 4
उपानत्, चतस्रः, इमे ।

22. कौचिद् द्वौ प्रयोगौ साधनीयौ – 2 + 2 = 4
वारि, अहोभ्याम्, पचन्ती

23. कौचिद् द्वौ प्रयोगौ साधनीयौ – 2 + 2 = 4
कृत्वा, पिबध्यै, स्मारं-स्मारम् ।

24. कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणमर्थो लेख्यः – 2 + 2 = 4
अजाद्यतष्टाप्, षिद्गौरादिभ्यश्च,
आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ।

25. कौचिद् द्वौ प्रयोगौ साधनीयौ – 2 + 2 = 4
कृष्णः, रामेण बाणेन हतो बाली, राज्ञः पुरुषः ।

26. केषाञ्चित् चतुर्णां शब्दानां ससूत्रं लिङ्गनिर्धारणं कुरुत – 1 + 1 + 1 + 1 = 4
मातृ, भूमिः, विंशतिः, यज्ञः, चयः, हसितम् ।

27. कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणमर्थो लेख्यः – 2 + 2 = 4
श्रोणियोन्यूर्मयः पुंसि च, तलन्तः, दाराक्षतलाजासूनां बहुत्वं च ।

28. केचित् त्रयः प्रयोगाः साधनीयाः – 2 + 2 + 2 = 6
पन्थानः, सः, विदुषः, अहम्, चतुरः ।

29. केचित् त्रयः प्रयोगाः साधनीयाः – 2 + 2 + 2 = 6
अश्वा, इन्द्राणी, गोपी, दाक्षी, युवतिः ।

30. केचित् त्रयः प्रयोगाः साधनीयाः – 2 + 2 + 2 = 6
कटे आस्ते, प्रजाभ्यः स्वस्ति, चोराद् बिभेति, अधिशेते वैकुण्ठं हरिः, हे राम ।

---

DO NOT WRITE ANYTHING HERE